श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ६८

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ६८

*रासक्रीडायां आनन्दपारवश्यवर्णनं*
*प्रणयकोपवर्णनं भवत्कृतसात्वनावर्णनं च*

तव विलोकनाद्गोपिकाजनाः प्रमदसङ्कुलाः पङ्कजेक्षण।
अमृतधारया संप्लुता इव स्तिमिततां दधुस्त्वत्पुरोगताः॥ १ ॥

तदनु काचन त्वत्कराम्बुजं सपदि गृह्णती निर्विशङ्कितम्।
घनपयोधरे सन्निधाय सा पुळकसंवृता तस्थुषी चिरम्॥ २ ॥

तव विभोऽपरा कोमळं भुजं निजगळान्तरे पर्यवेष्टयत्।
गळसमुद्गतं प्राणमारुतं प्रतिनिरुन्धतीवातिहर्षुला॥ ३ ॥

अपगतत्रपा कापि कामिनी तव मुखाम्बुजात् पूगचर्वितम्।
प्रतिगृहय्य तद्वक्त्रपङ्कजे निदधती गता पूर्णकामताम्॥ ४ ॥

विकरुणो वने संविहाय मामपगतोऽसि का त्वामिह स्पृशेत्।
इति सरोषया तावदेकया सजललोचनं वीक्षितो भवान्॥ ५ ॥

इति मुदाऽऽकुलैर्वल्लवीजनैः सममुपागतो यामुने तटे।
मृदुकुचाम्बरैः कल्पितासने घुसृणभासुरे पर्यशोभथाः॥ ६ ॥

कतिविधा कृपा केऽपि सर्वतो धृतदयोदयाः केचिदाश्रिते।
कतिचिदीदृशा मादृशेष्वपीत्यभिहितो भवान् वल्लवीजनैः॥ ७ ॥

अयि कुमारिका नैव शङ्क्यतां कठिनता मयि प्रेमकातरे।
मयि तु चेतसो वोऽनुवृत्तये कृतमिदं मयेत्यूचिवान् भवान्॥ ८ ॥

अयि निशम्यतां जीववल्लभाः प्रियतमो जनो नेदृशो मम।
तदिह रम्यतां रम्ययामिनीष्वनुपरोधमित्यालपो विभो॥ ९ ॥

इति गिराधिकं मोदमेदुरैर्व्रजवधूजनैः साकमारमन्।
कलितकौतुको रासखेलने गुरुपुरीपते पाहि मां गदात्॥ १० ॥

**********